| ज | बकः – अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति अहं तु शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञ इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्मीय च स्वसभायां विविधपदमलंकुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि अतः अहमेव वनराजपदप्राप्तये योग्यः।

मयूरः – *(वृक्षोपरितः-साट्टहासपूर्वकम्)* विरम विरम आत्मश्लाघायाः किं न जानासि यत्–

यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा।
अकर्णधारा जलधौ विप्लवेतेह नौरिव॥ (पृष्ठ 58)

**प्रश्नाः—**

**I. एकपदेन उत्तरत—**

(i) *शीतले जले स्थितप्रज्ञः इव कः तिष्ठति?*

(ii) *कीदृशी नौका जलधौ विप्लवेत्?*

**II. पूर्णवाक्येन उत्तरत—**

*बकः वन्यजन्तुनां रक्षोपायान् कथं चिन्तयितुं कथयति?*

**III. निर्देशानुसारम् उचितम् उत्तरम् प्रदत्तविकल्पेभ्यो चित्वा लिखत—**

(i) *'समुद्रे' इति पदस्य समानार्थकं पदम् किम्?*

(क) शीतले (ख) नौरिव (ग) निर्मीय (घ) जलधौ

(ii) *'चिन्तयिष्यामि' इति क्रिया पदस्य कर्तृपदं किम्?*

(क) अहम् (ख) अविचलः (ग) रक्षायाः (घ) शीलते

(iii) 'मां विहाय........।' अस्मिन् वाक्ये 'मां' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) बकाय (ख) मयूराय (ग) वानराय (घ) सिंहाय

(iv) *'गृहीत्वा' इति पदस्य विपरीतार्थकम् पदं किम्?*

(क) स्यात् (ख) विरम् (ग) विहाय (घ) मिलित्वा

**उत्तराणि—**

I. (i) बकः (ii) अकर्णधारा

II. बकः शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञः इव स्थित्वा वन्यजन्तूनां रक्षोपायान् चिन्तयितुं कथयति।

III. (i) (घ) जलधौ (ii) (क) अहम्

(iii) (क) बकाय (iv) (ग) विहाय